## दशमः पाठः

# नीतिश्लोकाः

सद्व्यवहारस्य शिक्षा एव नीतिः। विद्वांसः पद्यमाध्यमेन नियमस्य, अनुशासनस्य, सदाचारस्य, स्वास्थ्यरक्षणस्य, समाजरक्षणस्य, देशरक्षणस्य च शिक्षां ददति। ते एव श्लोकाः नीतिश्लोकाः कथ्यन्ते। छात्राणां ज्ञानार्थमेव एते नीतिश्लोकाः अत्र प्रस्तूयन्ते।

**यस्मिन्देशे न सम्मानो न वृत्तिर्न च बान्धवः।**
**न च विद्यागमः कश्चित् तं देशं परिवर्जयेत्॥1॥**

**अन्वयः** – यस्मिन् देशे न सम्मानः न वृत्तिः न च बान्धवः न च कश्चित् विद्यागमः तं देशं परिवर्जयेत्।

**शब्दार्थः** – वृत्तिः – आजीविका, बान्धवः – कुटुम्बी जन, विद्यागमः–विद्या का आगम।

**षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।**
**निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता॥2॥**

**अन्वयः** – निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रता इह षड्दोषाः भूतिम् इच्छता पुरुषेण हातव्याः।

**शब्दार्थः** – तन्द्रा – अर्ध निद्रा, दीर्घसूत्रता – किसी भी कार्य को देरी से करना।

**त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।**
**ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥3॥**

**अन्वयः** – कुलस्यार्थे एकं त्यजेत् ग्रामस्यार्थे कुलं त्यजेत् जनपदस्यार्थे ग्रामं आत्मार्थे पृथिवीं त्यजेत्।

**शब्दार्थः** – कुलस्यार्थे – वंश के लिए, जनपदस्यार्थे – नगर के लिए, आत्मार्थे – परम तत्त्व के लिए, त्यजेत् – त्याग देना चाहिए।

**विपदि धैर्यमथाभ्युदये क्षमा,**
**सदसि वाक्पटुता युधि विक्रमः।**
**यशसि चाभिरुचिर्व्यसनं श्रुतौ,**
**प्रकृतिसिद्धमिदं हि महात्मनाम्॥4॥**

**अन्वयः** – अथ विपदि धैर्यम् अभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः यशसि अभिरुचिः श्रुतौ च व्यसनं इदं हि महात्मनां प्रकृतिसिद्धम्।

**शब्दार्थः** – विपदि – आपत्ति में, अभ्युदये – उन्नति में, वाक्पटुता – वाणी की चतुरता, प्रकृतिसिद्धम् – स्वभाव–सिद्ध, सहजस्वाभाविक।

**न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचिद्रिपुः।**
**व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ॥5 ॥**

**अन्वयः –** कस्यचित् कश्चित् मित्रं न कस्यचित् कश्चित् रिपुः न मित्राणि तथा रिपवः व्यवहारेण जायन्ते।

**शब्दार्थः –** कस्यचित् – किसी का, रिपुः – शत्रु।

**उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे।**
**राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥6 ॥**

**अन्वयः –** उत्सवे व्यसने च एव दुर्भिक्षे राष्ट्रविप्लवे राजद्वारे श्मशाने च यः तिष्ठति सः बान्धवः।

**शब्दार्थः –** उत्सवे – विवाहादि उत्सव में, व्यसने – आपत्ति में, दुर्भिक्षे – अकाल में, राष्ट्रविप्लवे – राष्ट्र में विद्रोह होने पर।

**दुर्जनः प्रियवादी च नैतद्विश्वासकारणम्।**
**मधु तिष्ठति जिह्वाग्रे हृदि हालाहलं विषम् ॥7 ॥**

**अन्वयः –** दुर्जनः च प्रियवादी एतद् विश्वासकारणं न जिह्वाग्रे मधु तिष्ठति हृदि हालाहलं विषम्।

**शब्दार्थः–** दुर्जनः – दुष्ट, मधु – शहद

**पापान्निवारयति योजयते हिताय,**
**गुह्यं निगूहति गुणान्प्रकटीकरोति।**
**आपद्गतं च न जहाति ददाति काले,**
**सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥8 ॥**

**अन्वयः –** पापात् निवारयति हिताय योजयते गुह्यं निगूहति गुणान् प्रकटीकरोति आपद्गतं च न जहाति, काले ददाति सन्तः इदं सन्मित्रलक्षणं प्रवदन्ति।

**शब्दार्थः –** गुह्यम् – गुप्त बात को, न जहाति – नहीं छोड़ता है।

**जाड्यं धियो हरति सिञ्चति वाचि सत्यम्**
**मानोन्नतिं दिशति पापमपाकरोति।**
**चेतः प्रसादयति दिक्षु तनोति कीर्तिम्**
**सत्सङ्गतिः कथय किन्न करोति पुंसाम् ॥9 ॥**

**अन्वयः –** धियः जाड्यं हरति, वाचि सत्यं सिञ्चति, मानोन्नतिं दिशति, पापम् अपाकरोति, चेतः प्रसादयति दिक्षु कीर्तिं तनोति कथय सत्सङ्गतिः पुंसां किं न करोति।

**शब्दार्थः –** धियः जाड्यम् – बुद्धि की जड़ता को, अपाकरोति – दूर करती है, चेतः – चित्त या मन को, प्रसादयति – प्रसन्न करती है।

## अभ्यासः

### (1) एकपदेन उत्तरं लिखत –

(क) जनपदस्यार्थे कं त्यजेत् ?

(ख) विपदि किम् आवश्यकम् ?

(ग) मित्राणि रिपवः च कथं जायन्ते ?

(घ) सत्सङ्गतिः पापं किं करोति ?

### (2) एकवाक्येन उत्तरं लिखत –

(क) कस्यार्थे एकं त्यजेत् ?

(ख) सदसि किम् अपेक्षते ?

(ग) पापात् कः निवारयति ?

(घ) धियः जाड्यं का हरति ?

### (3) अधोलिखितप्रश्नानाम् उत्तराणि लिखत –

(क) महात्मनां किं किं प्रकृतिसिद्धं भवति ?

(ख) बान्धवः कः अस्ति ?

(ग) सन्मित्रलक्षणं किम् ?

(घ) सत्सङ्गतिः पुंसां किं करोति ?

### (4) रिक्तस्थानानि पूरयत –

(क) व्यवहारेण . . . . . . . . . जायन्ते . . . . . . . . तथा।

(ख) . . . . . . . . . . . . . . पृथिवीं त्यजेत्।

(ग) गुह्यं निगूहति. . . . . . . . . . . . . . प्रकटीकरोति।

(घ) दिक्षु . . . . . . . . . . . . . . कीर्तिम्।

(ङ) राजद्वारे श्मशाने च . . . . . . . . . . . . . . स बान्धवः।

### (5) युग्ममेलनं कुरुत –

| | (अ) | (आ) |
|---|---|---|
| (क) | युधि | व्यवहारेण जायन्ते |
| (ख) | मित्राणि | हलाहलं विषम् |
| (ग) | दुर्जनस्य हृदि | चेतः प्रसादयति |
| (घ) | सत्सङ्गतिः | विक्रमः |

## ( 6 ) शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं 'न' इति लिखत –

| | | |
|---|---|---|
| **यथा –** | **अभ्यागतः सर्वस्य गुरुः भवति।** | **आम्** |
| | **दीर्घसूत्रता उत्तमः गुणः।** | **न** |
| (क) | यत्र सम्मानः न भवति तत्र गन्तव्यम्। | |
| (ख) | आलस्यं परिवर्जनीयम्। | |
| (ग) | दुर्जने विश्वासः करणीयः। | |
| (घ) | सत्सङ्गतिः मानोन्नतिं दिशति। | |
| (ङ) | सन्मित्रं गुणान्प्रकटीकरोति। | |

## ( 7 ) श्लोकपूर्तिं कुरुत –

(क) षड्दोषाः – – – – – – – – – – – हातव्या – – – – – – – – – – – ।

निद्रातन्द्रा – – – – – – – – – – – आलस्यं – – – – – – – – – – ॥

(ख) उत्सवे – – – – – – – – – – दुर्भिक्षे – – – – – – – – – – – – ।

– – – – – – – – – – श्मशाने च – – – – – – – – स बान्धवः॥

## ( 8 ) सन्धिविच्छेदं कुरुत –

### उदाहरणं यथा –

| | | |
|---|---|---|
| **सर्वस्याभ्यागतः** | – | **सर्वस्य + अभ्यागतः** |
| विद्यागमः | – | . . . . . . . . . . . . . . . . . . । |
| पतिरेकः | – | . . . . . . . . . . . . . . . . . . । |
| सन्मित्रम् | – | . . . . . . . . . . . . . . . . . . । |
| कश्चित् | – | . . . . . . . . . . . . . . . . . . । |
| पापान्निवारयति | – | . . . . . . . . . . . . . . . . . . । |

## ( 9 ) उदाहरणानुसारं शब्दानां मूलशब्दं विभक्तिं वचनं च लिखत –

| शब्दः | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| **ग्रामस्य** | **ग्राम** | **षष्ठी** | **एकवचनम्** |
| वर्णानाम् | | | |
| पापात् | | | |
| गुणान् | | | |
| उत्सवे | | | |
| रिपवः | | | |
| मित्राणि | | | |
| व्यवहारेण | | | |

## ( 10 ) निम्नलिखितवाक्यानां शुद्धिः करणीया –

(क) सः गच्छसि।

(ख) ते पठति।

(ग) त्वं खेलामि।

(घ) यूयं लिखन्ति।

(ङ) अहं वदति।

(च) वयं चलामि।

## ( 11 ) निम्नलिखितक्रियापदानि भूतकाले परिवर्तयत –

### उदाहरणम्

**करोति** – **अकरोत्।**

तनोति – . . . . . . . . . . .।

जहाति – . . . . . . . . . . .।

ददाति – . . . . . . . . . . .।

सिञ्चति – . . . . . . . . . . .।

दिशति – . . . . . . . . . . .।

तिष्ठति – . . . . . . . . . . .।

### योग्यताविस्तारः –

- अन्यान् नीतिश्लोकान् अन्विष्य लिखत।

❖ ❖ ❖